

## एककम् - ५

# संस्कृतिः संस्कृताश्रिता

सर्वासां भारतीयभाषाणां जननी भवति संस्कृतभाषा। सा च भारतीयसंस्कृतिवाहिनी।अतः अस्मिन् एकके तस्याः संस्कृतेः परिचायनाय श्रीरामोदन्तात् उद्धृतः काव्यांशः आधुनिकी संस्कृतमासिकी प्रहेलिकाः च स्वीकृताः। अत्र श्रीरामचरितस्य आख्यानात् पूर्वं रामस्य जन्मोद्देश्यं वर्ण्यते।

# १२ .इष्टवरलाभः ।



श्रीरामोदन्ते श्रीरामस्य उदन्तः (वृत्तान्तः) प्रस्तूयते। संस्कृतभाषायां रचितं प्राचीनं काव्यमिदम् अज्ञातकर्तृकम्। तस्य आदिमाः पञ्चश्लोकाः अत्र स्वीकृताः।

**श्रीपतिं प्रणिपत्याहं**
**श्रीवत्साङ्कितवक्षसम्।**
**श्रीरामोदन्तमाख्यास्ये**
**श्रीवाल्मीकिप्रकीर्तितम्।।**

**पदच्छेदः।**

प्रणिपत्याहम् - प्रणिपत्य + अहम्।

श्रीरामोदन्तमाख्यास्ये - श्रीरामोदन्तम् + आख्यास्ये।

**अन्वयः** अहं श्रीवत्साङ्कितवक्षसं श्रीपतिं प्रणिपत्य श्रीवाल्मीकिप्रकीर्तितं श्रीरामोदन्तम् आख्यास्ये।

**आशयः** अहम् उरसि श्रीवत्सनामिकां मुद्रां धरन्तं लक्ष्मीपतिं (विष्णुं) नमस्कृत्य श्रीवाल्मीकि-महर्षिणा प्रकीर्तितस्य श्रीरामोदन्तस्य आख्यानं करिष्यामि।
(श्रीवाल्मीकिः रामायणं विरच्य लवकुशाभ्यां श्रावयामास। अतः श्रीरामोदन्तः श्रीवाल्मीकि प्रकीर्तितः।)



# 66

**पुरा विश्रवसः पुत्रो**
**रावणो नाम राक्षसः।**
**आसीदस्यानुजौ चास्ताम्**
**कुम्भकर्णविभीषणौ।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| आसीदस्यानुजौ | - | आसीत् + अस्य + अनुजौ। |
| चास्ताम् | - | च + आस्ताम्। |
| पुत्रो रावणो नाम | - | पुत्रः + रावणः + नाम। |

**अन्वयः** पुरा विश्रवसः पुत्रः रावणः नाम राक्षसः आसीत्। कुम्भकर्णविभीषणौ अस्य अनुजौ च आस्ताम्।

**आशयः** पुरा विश्रवाः नाम मुनिः आसीत्। तस्य त्रयः पुत्राः आसन्। राक्षसवंशे जातेषु तेषु ज्येष्ठः आसीत् रावणः। कुम्भकर्णः विभीषणः च तस्य द्वौ अनुजौ आस्ताम्।



**ते तु तीव्रेण तपसा**
**प्रत्यक्षीकृत्य वेधसम्।**
**वव्रिरे च वरानिष्टान्**
**अस्मादाश्रितवत्सलात्।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| वरानिष्टान् | - | वरान् + इष्टान्। |
| अस्मादाश्रितवत्सलात् | - | अस्मात् + आश्रितवत्सलात्। |

**अन्वयः** ते तु तीव्रेण तपसा वेधसं प्रत्यक्षीकृत्य आश्रितवत्सलात् अस्मात् इष्टान् वरान् वव्रिरे च।

**आशयः** रावणादयः कठिनतपसा भक्तवत्सलं ब्रह्मदेवं प्रत्यक्षीकृत्य तस्मात् इच्छानुरूपान् वरान् वरयामासुः।



**रावणो मानुषादन्यै-**
**रवध्यत्वं तथात्मनः।**
**निर्देवत्वेच्छया निद्रां**
**कुम्भकर्णोऽवृणीत च।।**

**पदच्छेदः।**

| | | |
|---|---|---|
| मानुषादन्यैरवध्यत्वम् | - | मानुषात् + अन्यैः + अवध्यत्वम्। |
| तथात्मनः | - | तथा + आत्मनः। |
| कुम्भकर्णोऽवृणीत | - | कुम्भकर्णः + अवृणीत। |

**अन्वयः** रावणः मानुषादन्यैः आत्मनः अवध्यत्वम् (अवृणीत)। तथा कुम्भकर्णः निर्देवत्वेच्छया निद्रां च अवृणीत।

**आशयः** रावणः मानुषादन्यः मां न हन्याद् इति वरं वव्रे। तद्वत् कुम्भकर्णः देवानाम् अभावम् अभिलषन् निद्रां च वव्रे।



**विभीषणो विष्णुभक्तिं**
**वव्रे सत्त्वगुणान्वितः।**
**तेभ्य एतान्वरान् दत्त्वा**
**तत्रैवान्तर्दधे प्रभुः।।**



**पदच्छेदः।**

| | | |
|---|---|---|
| तत्रैवान्तर्दधे | - | तत्र + एव + अन्तर्दधे। |
| तेभ्य एतान् | - | तेभ्यः + एतान्। |

**अन्वयः** सत्त्वगुणान्वितः विभीषणः विष्णुभक्तिं वव्रे। प्रभुः तेभ्यः एतान् वरान् दत्त्वा तत्र एव अन्तर्दधे।

**आशयः** सत्त्वगुणसम्पन्नः विभीषणः विष्णुभक्तिं वव्रे। ब्रह्मदेवः तेभ्यः एतान् वरान् दत्त्वा तत्र एव अप्रत्यक्षः अभवत्।

## किं करणीयम्?



काव्यं तालानुसारम् आलपतु।

**श्रद्धेयाः अंशाः।**

- उचितः तालः।
- आशयावबोधः।
- उच्चारणस्फुटता।



'रावणस्य द्वौ अनुजौ आस्ताम्'। अस्य आशयस्य सूचकं श्लोकं चित्वा लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयसम्बन्धः।
- स्खालित्यं विना लेखनम्।





काव्यभागस्य आशयं कथारूपेण परिवर्त्य लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- पूर्णता।
- वाक्यघटना।

## अनुबन्धः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| अङ्कितम् | चिह्नितम् | അടയാളപ്പെടുത്തിയ | marked |
| अन्वितः | युक्तः | ചേർന്ന | endowed with |
| आख्यास्ये | वक्ष्यामि | ഞാൻ പറയും | I would tell |
| आत्मनः | स्वस्य | തന്റെ, സ്വന്തം | mine |
| तीव्रम् | कठिनं | കഠിനമായ | strenuous |
| निर्देवत्वम् | देवराहित्यम् | ദേവന്മാരില്ലാത്ത അവസ്ഥ | non existence of devas |
| प्रकीर्तितम् | वर्णितम् | വർണിക്കപ്പെട്ടത് | described/narrated |
| वव्रिरे | वरयामासुः | വരിച്ചു | earned/obtained |
| वक्षः | उरः | മാറിടം | chest |
| वेधाः | ब्रह्मदेवः | ബ്രഹ്മാവ് | the God Bhrahman |
| श्रीपतिः | लक्ष्मीपतिः/विष्णुदेवः | മഹാവിഷ്ണു | the Lord Vishnu |
| सत्त्वगुणान्वितः | सत्त्वगुणयुक्तः | സത്വഗുണത്തോടുകൂടിയവൻ | with noble qualities |
| | (सत्त्वं,रजः, तमः इति त्रयो गुणाः) | | |

**विग्रहः** श्रीवत्साङ्कितवक्षसम् - श्रीवत्सेन अङ्कितं वक्षः यस्य सः श्रीवत्साङ्कितवक्षाः तम्।

श्रीपतिम् - श्रियः पतिः श्रीपतिः तम् ।

श्रीरामोदन्तः - श्रीरामस्य उदन्तः ।

आश्रितवत्सलात् - आश्रितेषु वत्सलः आश्रितवत्सलः, तस्मात्।

सत्त्वगुणान्वितः - सत्त्वगुणेन अन्वितः ।

**शब्दरूपावलिः।**

**सकारान्तः पुल्लिङ्गः वेधस् शब्दः।**

| **विभक्तिः** | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| प्रथमा | वेधाः | वेधसौ | वेधसः |
| सं.प्रथमा | हे वेधः | हे वेधसौ | हे वेधसः |
| द्वितीया | वेधसम् | वेधसौ | वेधसः |
| तृतीया | वेधसा | वेधोभ्याम् | वेधोभिः |
| चतुर्थी | वेधसे | वेधोभ्याम् | वेधोभ्यः |
| पञ्चमी | वेधसः | वेधोभ्याम् | वेधोभ्यः |
| षष्ठी | वेधसः | वेधसोः | वेधसाम् |
| सप्तमी | वेधसि | वेधसोः | वेधःसु/वेधस्सु। |

**नकारान्तः पुल्लिङ्गः ब्रह्मन् शब्दः।**

| **विभक्तिः** | **एकवचनं** | **द्विवचनं** | **बहुवचनं** |
|---|---|---|---|
| प्रथमा | ब्रह्मा | ब्रह्माणौ | ब्रह्माणः |
| सं.प्रथमा | हे ब्रह्मन् | हे ब्रह्माणौ | हे ब्रह्माणः |
| द्वितीया | ब्रह्माणम् | ब्रह्माणौ | ब्रह्मणः |
| तृतीया | ब्रह्मणा | ब्रह्मभ्यां | ब्रह्मभिः |

| | | | |
|---|---|---|---|
| चतुर्थी | ब्रह्मणे | ब्रह्मभ्यां | ब्रह्मभ्यः |
| पञ्चमी | ब्रह्मणः | ब्रह्मभ्यां | ब्रह्मभ्यः |
| षष्ठी | ब्रह्मणः | ब्रह्मणोः | ब्रह्मणाम् |
| सप्तमी | ब्रह्मणि | ब्रह्मणोः | ब्रह्मसु। |

**धातुरूपाणि।**

**आख्यास्ये - आङ् + चक्षिङ् व्यक्तायां वाचि - लृट् आ. प. उ. पु. ए. व.**

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र.पु. | आख्यास्यते | आख्यास्येते | आख्यास्यन्ते |
| म.पु. | आख्यास्यसे | आख्यास्येथे | आख्यास्यध्वे |
| उ.पु. | आख्यास्ये | आख्यास्यावहे | आख्यास्यामहे। |

**वव्रे वृङ् संभक्तौ लिट् आ. प. प्र. पु. ए. व.।**

| | एकवचनं | द्विवचनं | बहुवचनं |
|---|---|---|---|
| प्र.पु. | वव्रे | वव्राते | वव्रिरे |
| म.पु. | ववृषे | वव्राथे | ववृढ्वे |
| उ.पु. | वव्रे | ववृवहे | ववृमहे। |

**अवृणीत - वृङ् संभक्तौ लङ् आ. प. प्र. पु. ए. व.।**

| | | | |
|---|---|---|---|
| प्र.पु. | अवृणीत | अवृणाताम् | अवृणत |
| म.पु. | अवृणीथाः | अवृणाथाम् | अवृणीध्वम् |
| उ.पु. | अवृणि | अवृणीवहि | अवृणीमहि। |

**प्रयोगविशेषः।**

रावणो नाम - अत्र 'नाम' इति अव्ययं प्रसिद्धार्थे भवति।

वरानिष्टान् - विशेषणविशेष्ययोः समानलिङ्गविभक्तिवचनत्वम्।

तीव्रेण तपसा - विशेषणविशेष्ययोः समानलिङ्गविभक्तिवचनत्वम्।

आश्रितवत्सलात् अस्मात् - विशेषणविशेष्ययोः समानलिङ्गविभक्तिवचनत्वम्।

तेभ्यः (एतान् वरान् )दत्त्वा- दानार्थक्रियायोगे चतुर्थी।

**विग्रहाः।**

रामः - रमन्ते अस्मिन् इति।

रावणः - रावयति (उच्चैः रोदयति) इति।

वाल्मीकिः - वल्मीकस्य अपत्यं पुमान्।

कुम्भकर्णः - कुम्भौ इव कर्णौ यस्य सः।

विभीषणः - विगतं भीषणं यस्मात् सः।

## कैकसी।

सुमालिनः नाम राक्षसस्य केतुमाल्यां दश पुत्राः चतस्रः पुत्र्यः च अजायन्त। तासु अन्यतमा कैकसी रावणस्य माता आसीत्। राक्षसवंशे जातायाः कैकस्याः अपत्यानि इत्यतः रावणादयः अपि राक्षसाः संजाताः।

✱

वार्ता

# बालरञ्जिनी।

## संस्कृतदिनाचरणम्।




**अनन्तपुरी :-** विद्यालये श्रावणपूर्णिमायां संस्कृतदिनं समुचितरीत्या आचरितम्। सम्मेलनस्य उद्घाटनं सर्वकलाशालायाः कुलपतिः अकरोत्। भाषणावसरे सः एवम् अवदत् - "अस्माकं संस्कृतिः आर्षसंस्कृतिः भवति। तस्याः वाहिनी संस्कृतभाषा। अतः संस्कृतभाषापठनम् अत्यन्तम् अपेक्षितम्" इति। कार्यक्रमे विद्यालयस्य प्रथमाध्यापकः अध्यक्षभाषणमकरोत्। संस्कृताध्यापकः स्वागतभाषणं तथा छात्रनेता कृतज्ञताप्रकाशनं च अकुरुताम्। तदनन्तरं छात्राणां कला-कार्यक्रमाः आसन्।

## सुभाषितम्।

भाषासु मधुरा मुख्या
रम्या गीर्वाणभारती।
तस्यां हि काव्यं मधुरं
तत्रापि च सुभाषितम्।।

## पादटीकां रचयतु



## आप्तवाक्यानि।

- संस्कृतिः संस्कृताश्रिता।
- धर्मो रक्षति रक्षितः।
- साधूनां दुर्जनो विषम्।



नयने मे द्वे सूक्ष्मतरे
श्रवणे मे त्वतिविपुले च।
शुण्डा लम्बति पुरतो मे
दन्तौ धवलौ बहुमूल्यौ।।

## मुनित्रयम्।




### किं नास्ति संस्कृते?

चतुर्वेदाः, षड्वेदाङ्गानि, उपनिषदः अष्टादशपुराणानि, द्वे इतिहासे, काव्यानि, नाटकानि, सुभाषितानि, आप्तवाक्यानि, कथाः........

कोष्ठके दत्तानि अक्षराण्युपयुज्य संस्कृत कवीनां नामानि यावच्छक्यं लिखतु।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| त्मी | भा | घः | वा | भ | दा | बा | श्री |
| रिः | का | र्षः | व्या | ह | द | किः | ण |
| सः | र्तृ | विः | मा | लि | र | ट्टः | ण्डिः |

१......................   ६......................

२......................   ७......................

३......................   ८......................

४......................   ९......................

५......................   १०......................

## पञ्चमहाकाव्यानि।





## किं करणीयम् ?



मासिकीं पठित्वा संस्कृतभाषायाः महत्त्वप्रतिपादकं प्रभाषणं करोतु।

**श्रद्धेयाः अंशाः।**

- आत्मविश्वासेन भाषणम्।
- आशयव्यक्तता।
- अक्षरस्फुटता।
- विषयज्ञानम्।

### शब्दकोशः।

| | | | |
|---|---|---|---|
| नितराम् | अत्यन्तम् | ഏറ്റവും | very much |
| रञ्जिनी | विनोदिनी | ആനന്ദിപ്പിക്കുന്ന | pleasing |
| श्रावणपूर्णिमा | श्रावणमासपौर्णमी | ശ്രാവണമാസത്തിലെ പൂർണ്ണിമ | full moon day of the sravana month |
| वाहिनी | वहन्ती | വഹിക്കുന്നവൾ | one who brings |
| कृतज्ञता | धन्यवादः | നന്ദി | thanks |
| अकुरुताम् | कुरुतः स्म | ചെയ്തു | did |
| रम्या | मनोहरा | മനോഹരി | charming |
| गीर्वाणभारती | देवभाषा | ദേവഭാഷ | Sanskrit |
| रक्षितः | पालितः | രക്ഷിക്കപ്പെട്ടവൻ | the protected |
| साधूनाम् | सज्जनानाम् | സജ്ജനങ്ങളുടെ | of the virtuous ones |

## धातुरूपाणि।

**वर्तन्ते  वृतु वर्तने लट्. आ. प. प्र. पु. ब. व.**

| | | |
|---|---|---|
| वर्तते | वर्तेते | वर्तन्ते |
| वर्तसे | वर्तेथे | वर्तध्वे |
| वर्ते | वर्तावहे | वर्तामहे। |

*

# १४. हैमं दास्यामि कङ्कणम्।

भारतवर्षे प्रचाल्यमानेषु साहित्यविनोदेषु अन्यतमा भवति प्रहेलिका। बुद्धिविकासाय प्रहेलिकाः उपकुर्वन्ति। हास्यं विनोदः इत्यादीनां पोषणाय मानसोल्लासाय च इमाः सहायिकाः भवन्ति। पश्यत -

विराटनगरे रम्ये
कीचकादुपकीचकम्।
अस्य क्रियापदं वक्तुः
हैमं दास्यामि कङ्कणम्।।



न तस्यादिर्न तस्यान्तः
मध्ये यस्तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति
यदि जानासि तद्वद।।



वृक्षाग्रवासी न तु पक्षिराजः
त्रिनेत्रधारी न तु शूलपाणिः।
त्वग्वस्त्रधारी न तु सिद्धयोगी
जलं च धत्ते न घटो न मेघः।।





नेत्रयोर्निकटे वासः
पादौ विन्यस्य कर्णयोः।
मध्यं संस्थाप्य नासाग्रे
क्रुद्धस्यास्ते भयं विना।।



अन्वयः - रम्ये विराटनगरे कीचकाद् उपकीचकम्। अस्य क्रियापदं वक्तुः हैमं कङ्कणं दास्यामि।

आट - अट गतौ - लिट्. प. प. प्र. पु. ए. व.।

हैमं - हिमसम्बन्धि। हेमसम्बन्धि च

कङ्कणं - कं कणम्। (जलकणम् / हस्तवलयं)

विः + आट विः - पक्षी। आट - चचार।

तस्य आदिः न। तस्य अन्तः न। तस्य मध्ये यः तिष्ठति। तव अपि अस्ति मम अपि अस्ति। यदि (त्वं) जानासि तद् वद। (चित्रे अस्याः उत्तरम् अस्ति।)

वृक्षाग्रवासी (सः) पक्षिराजः तु न। त्रिनेत्रधारी (सः) शूलपाणिः न। त्वग् वस्त्रधारी(सः) च सिद्धयोगी न। जलं धत्ते न घटः, न मेघः च। (चित्रं निरीक्ष्य वदतु)

कर्णयोः पादौ विन्यस्य नेत्रयोः निकटे वासः। क्रुद्धस्य नासाग्रे (अपि) मध्यं संस्थाप्य भयं विना आस्ते। (चित्रे उत्तरं वर्तते।)

**किं करणीयम् ?**



दत्ताः प्रहेलिकाः पठित्वा उत्तराणि निर्धार्य लिखतु।

- वृन्तविहीनं वर्तुलपत्रम्।
- पुत्राः सर्वे टोपीवन्तः।
- कर्णग्रहणे मुखविस्तारः।

(अण्डम्, पूगफलम्, पर्पटकम्, कर्तरी, नौका)

❖ प्रहेलिकाः सञ्चित्य सम्पुटमेकं रचयतु।

# अनुबन्धः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| रम्यम् | मनोहरम् | മനോഹരമായ | beautiful/attractive |
| कीचकम् | वंशः | മുള | bamboo |
| उप | समीपे | സമീപം | near |
| हैमं | तुषारमयम्/सौवर्णम् | മഞ്ഞ് (സ്വർണം) | snow/golden |
| कङ्कणम् | कटकम् | വള | bangle |
| कम् | जलम् | വെള്ളം | water |
| कणः | बिन्दु | തുള്ളി | drop |
| आदिः | आद्योभागः | ആദ്യഭാഗം | the beginning |
| अन्तः | अन्तिमं | അവസാനം | last |
| मध्ये | मध्यभागे | നടുവിൽ | in the middle of |
| जानाति | अवगच्छति | അറിയുന്നു | knows |
| वद | कथय | പറയൂ | tell |
| वृक्षाग्रः | वृक्षस्य अग्रः | വൃക്ഷത്തിന്റെ അഗ്രത്തിൽ | the tip of the tree |
| पक्षिराजः | गरुडः | ഗരുഡൻ | Garuda |
| शूलपाणिः | शिवः | ശിവൻ | Lord Siva |
| सिद्धयोगी | तापसः | സന്യാസി | saint |
| घटः | कलशः, कुम्भः | കുടം | pot |
| निकटे | समीपे | അടുത്ത് | near |
| विन्यस्य | निक्षिप्य | വെച്ചിട്ട് | having placed |
| आस्ते | वर्तते | ഇരിക്കുന്നു | exists |

**पदच्छेदः।**

| | | |
|---|---|---|
| कीचकादुपकीचकम् | - | कीचकात् + उपकीचकम्। |
| कङ्कणम् | - | कम् + कणम्। |
| तस्यादिर्न | - | तस्य + आदिः + न। |
| तस्यान्तः | - | तस्य + अन्तः। |
| यस्तस्य | - | यः + तस्य। |
| तवाप्यस्ति | - | तव + अपि + अस्ति। |
| तद्वद | - | तत् + वद। |
| नेत्रयोर्निकटे | - | नेत्रयोः + निकटे। |
| क्रुद्धस्यास्ते | - | क्रुद्धस्य + आस्ते। |



## किमार्जितम् ?

**निर्देशाः**

अधः प्रदत्तानि प्रवर्तनानि समुचितया रीत्या कृतानि चेत् सिंहस्य  , भागिकतया कृतानि चेत् गजस्य  च चित्राणि यथास्थानं वर्णैः विरच्यन्ताम्।

1. काव्यं तालानुसारम् आलपितम् -
2. काव्यस्य आशयः कथारूपेण लिखितः -
3. कवीनां नामानि लिखितानि -
4. प्रभाषणं कृतम् -
5. पादटीका रचिता -
6. प्रहेलिकायाः उत्तराणि चितानि -